Shri Raghunatha Temple MSS. Library,
JAMMU

No. ९६२ · ध

Title तर्कसंग्रहः

Author अन्नंभट्टः

Extent 6 Age

Subject न्यायवैशेषिकम · सम्पूर्णम्

नं० ६६२-घ

तर्कसंग्रहः (न्यायवैशेषिकम्)

पत्राणि ८ (सम्पूर्णम्)

नं० ५६२-घ

कर्ता अन्नं भट्टः

नं० ६६२-च
तर्कसंग्रहः (न्यायवैशेषिकम्)
पत्राणि ८ (सम्पूर्णम्)
कर्ता अन्नं भट्टः

नं० ९६२-घ
तर्कसंग्रहः
८ पत्राणि
न्यायवैशेषिकदर्शन
कर्त्ता- अन्नंभट्टः

त० सं० १

ॐ श्रीगणेशाय नमः॥ निधाय हृदि विश्वेशं विधाय गुरुवंदनं बालानां सुखबोधाय क्रियते तर्कसंग्रहः॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः॥ तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव॥ तत्र रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः॥ कर्माणि उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंच॥ परमपरं चेति द्विविधं सामान्यं॥ नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव॥ समवायस्त्वेक एव॥ अभावस्तु चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याभावश्चेति॥ गंधवती पृथिवी सा द्विविधा नित्याऽनित्या च॥ नित्या परमाणुरूपा॥ अनित्या कार्यरूपा॥ पुनस्त्रिविधा शरीरेंद्रियविषयभेदात्॥ शरीरमस्मदादीनां॥ इंद्रियं गंधग्राहकं घ्राणं नासाग्रवर्ति॥ विषयो मृत्पाषाणादिः॥ शीतस्पर्शवत्य आपः॥ ता द्विविधाः नित्याऽनित्याश्च॥ नित्याः परमाणुरूपाः॥ अनित्याः कार्यरूपाः॥ पुनस्त्रिविधाः शरीरेंद्रियविषयभेदात्॥ शरीरं वरुणलोके॥ इंद्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति॥

विषयः सरित्समुद्रादि उष्णस्पर्शवत्तेजः तच्च द्विविधं नित्यमनित्यं च नित्यं परमा
णुरूपं अनित्यं कार्यरूपं पुनस्त्रिविधं शरीरेंद्रियविषयभेदात् शरीरमादित्य
लोके इंद्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्त्ति विषयश्चतुर्विधः भौमदिव्योदर्या
करजभेदात् भौमं वह्न्यादिकं दिव्यं विद्युतादिः भुक्तस्य परिणामहेतुरौदर्यं आक
रजं सुवर्णादिः रूपरहितस्पर्शवान् वायुः स द्विविधः नित्यश्चानित्यः नित्यः परमाणुरूपः
अनित्यः कार्यरूपः पुनस्त्रिविधः शरीरेंद्रियविषयभेदात् शरीरं वायुलोके इंद्रि
अंको यं [illegible] ग्राहकं त्वक् सर्वशरीरवर्त्ति विषयो वृक्षादिकंपनहेतुः शरीरांतःसंचारी वायुः
प्राणः स चैकोपि उपाधिभेदात् प्राणापानादिसंज्ञां लभते शब्दगुणमाकाशं तच्चै
कं विभुनित्यं च अतीतादिव्यवहारहेतुः कालः स चैको [illegible] विभुर्नित्यश्च प्राच्यादिव्यवहा
रहेतुर्दिक् सा चैका विभ्वी नित्या च ज्ञानाधिकरणमात्मा स द्विविधः परमात्मा जीव
श्च तत्रेश्वरः सर्वज्ञः परमात्मा एक एव जीवः प्रतिशरीरं भिन्नो विभुर्नित्यश्च सुखाद्यु
पलब्धिसाधनमिंद्रियं मनः तच्च प्रत्यात्मनियतत्वादनंतं परमाणुरूपं नित्यं च अथ
गुणाः चक्षुर्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतरक्तहरितकपिशचित्र
त

भेदात् सप्तविधं पृथिवीजलतेजोवृत्ति तत्र पृथिव्यां सप्तविधं अभास्वरं शुक्लं जलेऽभा
स्वरं भास्वरं तेजसि रसनाग्राह्यो गुणो रसः स च मधुराम्ललवणकटुकषायति
क्तभेदात् षड्विधः पृथिवीजलवृत्तिः तत्र पृथिव्यां षड्विधः जले मधुर एव घ्रा
णग्राह्यो गुणो गन्धः स च द्विविधः सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः त्वगिन्द्रि
यमात्रग्राह्यो गुणः स्पर्शः स च त्रिविधः शीतोष्णानुष्णाशीतभेदात् पृथिवीज
लतेजोवायुवृत्तिः तत्र शीतो जले उष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोः रूपादि
चतुष्टयं वृत्तिः पृथिव्यां पाकजं अनित्यं अन्यत्रापाकजं नित्यमनित्यं च नित्य
गतं नित्यं अनित्यगतं अनित्यं एकादिव्यवहारहेतुः संख्या नवद्रव्यवृत्तिः एकत्वा
दिपरार्द्धपर्यन्ता एकत्वं नित्यगतं नित्यं अनित्यगतं अनित्यं द्वित्वादिकं तु सर्वत्रा
नित्यमेव मानव्यवहारासाधारणकारणं परिमाणं नवद्रव्यवृत्ति तच्चतुर्विधं अणु
महद्दीर्घं ह्रस्वं चेति पृथग्व्यवहारासाधारणकारणं पृथक्त्वं सर्वद्रव्यवृत्तिः संयुक्त
व्यवहारहेतुः संयोगः संयोगनाशको गुणो विभागः सर्वद्रव्यवृत्तिः परापरव्यवहारा
साधारणे परत्वापरत्वे तद्द्विविधे दिक्कृते कालकृते चेति दूरस्थे दिक्कृतं परत्वं समी

मिवस्थे दिष्ठे तं अपरत्वं ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतं अपरत्वं
आद्यपतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्तिः स्यंदनासमवायिकारणं द्रव
त्वं पृथिव्यप्तेजोवृत्तिः तद्द्विविधं सांसिद्धिकं नैमित्तिकं चेति सांसिद्धिकं जले नैमित्ति
कं पृथिवीतेजसोः पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं तेजसि सुवर्णादौ च
र्णादिपिंडीभावहेतुः गुणः स्नेहः जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः शब्दः आका
शमात्रवृत्तिः स द्विविधः ध्वन्यात्मको वर्णात्मकश्चेति ध्वन्यात्मको भेर्यादौ वर्णा
त्मकः संस्कृतभाषादिरूपः सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं सा द्विविधा स्मृतिरनु
भवश्च संस्कारजन्यं ज्ञानं स्मृतिः तद्भिन्नं ज्ञानमनुभवः स द्विविधः यथार्थो
ऽयथार्थश्च तद्वति तत्प्रकारकोनुभवो यथार्थः सैव प्रमेत्युच्यते तदभा
ववति तत्प्रकारकोनुभवोऽयथार्थः यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमि
त्युपमितिशाब्दभेदात् तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्द
भेदात् असाधारणं कारणं करणं कार्यनियतपूर्ववृत्तित्वं कारणं

१०

३

प्रागभावप्रतियोगि कार्यं कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् यत्स-
मवेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा तंतवः पटस्य पटश्च
स्वगतरूपादेः कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदस-
मवायिकारणं यथा तंतुसंयोगः पटस्य तंतुरूपं पटरूपस्य तदुभयभिन्नं कारणं
निमित्तकारणं यथा तुरीवेमादिकं पटस्य तदेतत्त्रिविधकारणमध्ये यदसा-
धारणं कारणं तदेव करणं तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षप्रमाणं इंद्रियार्थसंनि-
कर्षजन्यं ज्ञानं प्रत्यक्षं तद्द्विविधं निर्विकल्पकं सविकल्पकं चेति तत्र निःप्रका-
रकं ज्ञानं निर्विकल्पकं सप्रकारकं ज्ञानं सविकल्पकं यथा किंचिदिदमिति यथा डित्थो-
यं ब्राह्मणोयं श्यामोयं इति तत्र प्रत्यक्षज्ञानहेतुरिंद्रियार्थसंनिकर्षः षड्विधः ॥
संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशे-
षणविशेष्यभावश्चेति चक्षुषा घटप्रत्यक्षजनने संयोगः संनिकर्षः घटरूपप्रत्यक्ष-
जनने संयुक्तसमवायसंनिकर्षः चक्षुःसंयुक्ते घटे रूपस्य समवायात् रूपत्वसामान्य-
प्रत्यक्षे संयुक्तसमवेतसमवायसंनिकर्षः चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र समवायात् सं-

म

एं

तं तत्र रूपत्वस्य समवायात् श्रोत्रे शब्दसाक्षात्कारे समवायसन्निकर्षः कर्णविव
रवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवा
यात् शब्दत्वसाक्षात्कारे समवेतसमवायः संनिकर्षः घटाभाववद्भूतलमि
त्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् एवं सन्निकर्षषट्कज
न्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धं
इति प्रत्यक्षः अनुमितिकरणमनुमानं परामर्शजन्यं ज्ञानमनुमितिः व्याप्ति
विशिष्टपक्षधर्मताज्ञानं परामर्शः यथा वह्निव्याप्यधूमवानयं पर्वत इति
ज्ञानं परामर्शः तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः यत्र यत्र धूम
स्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः व्याप्यस्य पर्वतादिवृत्तित्वं पक्षध
र्मता अनुमानं द्विविधं स्वार्थं परार्थं च स्वार्थं स्वानुमितिहेतुः तथाहि स्वय
मेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा
पर्वतसमीपं गतः तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्म
रति यत्र धूमस्तत्राग्निरिति तदनंतरं वह्निव्याप्यधूमवानयं पर्वतः

इति ज्ञानमुत्पद्यते अयमेव लिंगपरामर्श इत्युच्यते तस्मात्पर्वतो वह्निमानिति
ज्ञानमनुमितिरुत्पद्यते तदेव स्वार्थानुमानं यत्तु स्वयं धूमादग्निमनुमाय परं
बोधयितुं पंचावयववाक्यं प्रयुज्यते तत्परार्थानुमानं यथा पर्वतो वह्निमान्
धूमवत्वात् यो यो धूमवान् सः सोऽग्निमान् यथा महानसः तथा चायं तस्मा
त्तथेति अनेन प्रतिपादितात् लिंगात् परोऽप्यग्निं प्रतिपद्यते प्रतिज्ञाहेतूदाह
रणोपनयनिगमनानि पंचावयवाः पर्वतो वह्निमानिति प्रतिज्ञा धूमवत्वादिति
हेतुः यो यो धूमवान् सः सोऽग्निमान् इति उदाहरणं तथा चायमित्युपनयः
तस्मात्तथेति निगमनं स्वार्थानुमिति परार्थानुमित्योर्लिंगपरामर्श
एव करणं तस्माल्लिंगपरामर्शोऽनुमानं लिंगं त्रिविधं अन्वयव्यतिरेकि केवला
न्वयि केवलव्यतिरेकि चेति अन्वयेन व्यतिरेकेण च यत्तद्व्याप्तिमदन्व
यव्यतिरेकि यथा वह्नौ साध्ये धूमवत्वं यत्र धूमस्तत्राग्निरित्यन्वयव्या
प्तिः यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रदः इति व्यतिरेकव्याप्तिः

अन्वयव्याप्तिकं केवलान्वयि यथा घटोऽभिधेयः प्रमेयत्वात्पटवदिति अत्र प्रमे
यत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च व्य
तिरेकव्याप्तिकं केवलव्यतिरेकि यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् यदितरे
भ्यो न भिद्यते न तद्गन्धवत् यथा जलं न चेयं तथा तस्मान्न तथेति अत्र यद्गन्धवत्त
दितरेभ्यो भिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् सन्दिग्धसा
ध्यवान्पक्षः यथा धूमवत्त्वे हेतौ पर्वतः निश्चितसाध्यवान्सपक्षः यथा तत्रैव म
हानसः निश्चितसाध्याभाववान्विपक्षः यथा तत्रैव महाह्रदः सव्यभिचारविरु
द्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः सव्यभिचारोऽनैकान्तिकः स त्रिविधः सा
धारणासाधारणानुपसंहारिभेदात् तत्र साध्याभाववद्वृत्तिः साधारणोऽनैका
न्तिकः यथा पर्वतो वह्निमान्प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्य
मानत्वात् सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः यथा शब्दो नित्यः शब्दत्वादि
ति शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्तिः अन्वयव्यतिरेकदृष्टान्तर
हितोऽनुपसंहारी यथा सर्वमनित्यं प्रमेयत्वादिति अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति

५

साध्याभाववत्त्वमोक्षेतुर्विरुद्धः यथा शब्दो नित्यः कृतकत्वादित्यत्र कृतकत्वं हि नित्यत्वाभावे
नानित्यत्वेन व्याप्तं साध्याभाववत्साधकं हेतुस्तदन्तरं यस्य स सत्प्रतिपक्षः यथा शब्दो नित्यः श्रा
5 वणत्वात् शब्दत्ववदिति शब्दोऽनित्यः कार्यत्वात् घटवदिति आश्रयासिद्धि विधः आश्रया
सिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति आश्रयासिद्धो गगनारविंदं सुरभि अरवि
दत्वात् सरोजारविंदवत् इति अत्र गगनारविंदमाश्रयः स च नास्त्येव पक्षे हेत्वभावः स्वरूपा
सिद्धो यथा यथा शब्दो गुणः चाक्षुषत्वादित्यत्र चाक्षुषत्वं शब्दे नास्त्येव शब्दस्य श्रावणत्वा
त् सोपाधिको व्याप्यत्वासिद्धः साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः साध्यसमानाधि
करणात्यन्ताभावाप्रतियोगित्वे साध्यव्यापकत्वं साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं
साध्यव्यापकत्वे साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं पर्वतो धूमवा
न् वह्निमत्त्वात् इत्यत्रार्द्रेन्धनसंयोग उपाधिः यत्र धूमस्तत्रार्द्रेन्धनसंयोग उपाधिः यत्र धूमस्त
त्रार्द्रेन्धनसंयोग इति नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावात् एवं साध्यव्यापक
त्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासि
द्धः यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः यथा वह्निरनुष्णो द्रव्यत्वादिति
अत्रानुष्णत्वं साध्यं तदभावः उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यते इति बाधितत्वं व्याख्या

तमनुमानुमानं॥ उपमितिकरणमुपमानं संज्ञासंज्ञी संबंधज्ञानमुपमितिः तत्करणं सा-
दृश्यज्ञानं तथाहि कश्चिद्गवयपदार्थमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृ-
शो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसादृश्यं पिंडं पश्यति तदनंतरं असौ गवयपद-
वाच्य इत्युपमितिरुत्पद्यते इत्युपमानं॥ आप्तवाक्यं शब्दः आप्तस्तु यथार्थवक्ता
वाक्यं पदसमूहः यथा गामानय शुक्लां दंडेनेति शक्तं पदं अस्मात्पदादयमर्थो बोद्ध-
व्यः इतीश्वरसंकेतः शक्तिः आकांक्षायोग्यतासन्निधिश्च वाक्यार्थज्ञाने हेतुः
पदस्य पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा अर्थाबाधो योग्यता पदा-
नामविलंबेनोच्चारितानि गामानय शुक्लां दंडेनेत्यादि पदानि न प्रमाणं योग्यताविर-
हात् प्रहरे प्रहरे असहोच्चारितानि सन्निधिः तथा चैवाकांक्षादिरहितं वाक्यम-
प्रमाणं यथा गौरश्वः पुरुषो हस्ती न प्रमाणं आकांक्षाविरहात् अग्निना सिंचेदिति न
प्रमाणं योग्यताविरहात् प्रहरे प्रहरे असहोच्चारितानि गामानय शुक्लां दंडेनेत्या-
दि पदानि न प्रमाणं सन्निध्यभावात् वाक्यं द्विविधं वैदिकं लौकिकं च वैदिकमी-
श्वरोक्तत्वात् सर्वमेव प्रमाणं लौकिकं तु आप्तोक्तं प्रमाणं अन्यदप्रमाणं वाक्यार्थज्ञानं
शाब्दज्ञानं तत्करणं शब्दः इति शब्दप्रमाणं॥ यथार्थानुभवः निरूपितः अयथार्थानु-

त० सं

६

स्त्रिविधः संशयविपर्ययतर्कभेदात् एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि
ज्ञानं संशयः यथा स्थाणुर्वा पुरुषो वेति मिथ्याज्ञानं विपर्ययः यथा शुक्तौ इदं रजतमिति
व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति स्मृति
रपि द्विविधा यथार्था अयथार्था च प्रमाजन्या यथार्था अप्रमाजन्याऽयथार्था सर्वे
षामनुकूलवेदनीयं सुखं प्रतिकूलवेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः कृतिः प्रय
त्नः विहितकर्मजन्यो धर्मः निषिद्धकर्मजन्योऽधर्मः बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः
बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च नित्या ईश्वरस्य अनित्या जीवस्य संस्कारस्त्रिविधः
वेगो भावना स्थितिस्थापकश्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः अनुभवज
न्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थिति
स्थापकः कटादिपृथिवीवृत्तिः इति गुणाः चलनात्मकं कर्म ऊर्ध्वदेशसंयोगहेतुरु
त्क्षेपणं अधोदेशसंयोगहेतुरपक्षेपणं शरीरसन्निकृष्टसंयोगहेतुराकुञ्च
नं विप्रकृष्टसंयोगहेतुः प्रसारणं अन्यत्सर्वं गमनं नित्यमेकमनेकानुगतं सामा

मान्यं द्रव्यगुणकर्मवृत्तिः परं सत्तापरं जातिः द्रव्यत्वादिः नित्यद्रव्यवृत्तयो व्यावर्तका वि
शेषाः नित्यसंबंधः समवायः अयुतसिद्धवृत्तिः ययोर्द्वयोर्मध्ये एकमपराश्रित
मेवावतिष्ठते तावयुतसिद्धौ अवयवावयविनौ क्रियाक्रियावतो जातिव्यक्ती विशे
षनित्यद्रव्ययोश्चेति अनादिः सांतः प्रागभाव उत पूर्वं कार्यस्य सादिरनंतः प्रध्वंसः
उत्पत्त्यनंतरं कार्यस्य त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोत्यंताभावः यथा भू
तले घटो नास्तीति तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोन्योन्याभावः यथा घटः
पटो न भवतीति सर्वेषां पदार्थानां यथा यथायथा यथोक्तेष्वंतर्भावात्सप्तपदार्था
इति सिद्धं कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये अन्नंभट्टेन विदुषा रचित
स्तर्कसंग्रहः इति तर्कसंग्रहस्समाप्तः रामाय रा मा य न मः

नं० ६६२-घ
तर्क संग्रह ।
पत्राणि ८
कर्ता अन्नं भट्टः